# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ६५

तथा तु करुणं तस्य द्विजस्य परिदेवितम् ।
शुश्राव राघवः सर्वं दुःखशोकसमन्वितम् ॥ १॥

स दुःखेन सुसन्तप्तो मन्त्रिणः समुपाह्वयत् ।
वसिष्ठं वामदेवं च भ्रातॄंश्च सहनैगमान् ॥ २॥

ततो द्विजा वसिष्ठेन सार्धमष्टौ प्रवेशिताः ।
राजानं देवसङ्काशं वर्धस्वेति ततोऽब्रुवन् ॥ ३॥

मार्कण्डेयोऽथ मौद्गल्यो वामदेवश्च काश्यपः ।
कात्यायनोऽथ जाबालिर्गौतमो नारदस्तथा ॥ ४॥

एते द्विजर्षभाः सर्वे आसनेषूपवेशिताः ।
मन्त्रिणो नैगमाश्चैव यथार्हमनुकूलतः ॥ ५॥

तेषां समुपविष्टानां सर्वेषां दीप्ततेजसाम् ।
रघवः सर्वमाचष्टे द्विजो यस्मात्प्ररोदिति ॥ ६॥

तस्य तद्वचनं श्रुत्वा राज्ञो दीनस्य नारदः ।
प्रत्युवाच शुभं वाक्यमृषीणां संनिधौ नृपम् ॥ ७॥

शृणु राजन्यथाकाले प्राप्तोऽयं बालसङ्क्षयः ।
श्रुत्वा कर्तव्यतां वीर कुरुष्व रघुनन्दन ॥ ८॥

पुरा कृतयुगे राम ब्राह्मणा वै तपस्विनः ।
अब्राह्मणस्तदा राजन्न तपस्वी कथं चन ॥ ९॥

तस्मिन्युगे प्रज्वलिते ब्रह्मभूते अनावृते ।
अमृत्यवस्तदा सर्वे जज्ञिरे दीर्घदर्शिनः ॥ १०॥

ततस्त्रेतायुगं नाम मानवानां वपुष्मताम् ।
क्षत्रिया यत्र जायन्ते पूर्वेण तपसान्विताः ॥ ११॥

वीर्येण तपसा चैव तेऽधिकाः पूर्वजन्मनि ।
मानवा ये महात्मानस्तस्मिंस्त्रेतायुगे युगे ॥ १२॥

ब्रह्मक्षत्रं तु तत्सर्वं यत्पूर्वमपरं च यत् ।
युगयोरुभयोरासीत्समवीर्यसमन्वितम् ॥ १३॥

अपश्यन्तस्तु ते सर्वे विशेषमधिकं ततः ।
स्थापनं चक्रिरे तत्र चातुर्वर्ण्यस्य सर्वतः ॥ १४॥

अधर्मः पादमेकं तु पातयत्पृथिवीतले ।
अधर्मेण हि संयुक्तास्तेन मन्दाभवन्द्विजाः ॥ १५॥

ततः प्रादुष्कृतं पूर्वमायुषः परिनिष्ठितम् ।
शुभान्येवाचरँल्लोकाः सत्यधर्मपरायणाः ॥ १६॥

त्रेतायुगे त्ववर्तन्त ब्राह्मणाः क्षत्रियश् च ये ।
तपोऽतप्यन्त ते सर्वे शुश्रूषामपरे जनाः ॥ १७॥

स धर्मः परमस्तेषां वैश्यशूद्रमथागमत् ।
पूजां च सर्ववर्णानां शूद्राश्चक्रुर्विशेषतः ॥ १८॥

ततः पादमधर्मस्य द्वितीयमवतारयत् ।
ततो द्वापरसङ्ख्या सा युगस्य समजायत ॥ १९॥

तस्मिन्द्वापरसङ्ख्ये तु वर्तमाने युगक्षये ।
अधर्मश्चानृतं चैव ववृधे पुरुषर्षभ ॥ २०॥

तस्मिन्द्वापरसङ्ख्याते तपो वैश्यान्समाविशत् ।
न शूद्रो लभते धर्ममुग्रं तप्तं नरर्षभ ॥ २१॥

हीनवर्णो नरश्रेष्ठ तप्यते सुमहत्तपः ।
भविष्या शूद्रयोन्यां हि तपश्चर्या कलौ युगे ॥ २२॥

अधर्मः परमो राम द्वापरे शूद्रधारितः ।
स वै विषयपर्यन्ते तव राजन्महातपाः ।
शूद्रस्तप्यति दुर्बुद्धिस्तेन बालवधो ह्ययम् ॥ २३॥

यो ह्यधर्ममकार्यं वा विषये पार्थिवस्य हि ।
करोति राजशार्दूल पुरे वा दुर्मतिर्नरः ।
क्षिप्रं हि नरकं याति स च राजा न संशयः ॥ २४॥

स त्वं पुरुषशार्दूल मार्गस्व विषयं स्वकम् ।

दुष्कृतं यत्र पश्येथास्तत्र यत्नं समाचर ॥ २५ ॥

एवं ते धर्मवृद्धिश्च नृणां चायुर्विवर्धनम् ।
भविष्यति नरश्रेष्ठ बालस्यास्य च जीवितम् ॥ २६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com